दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः

पञ्चाङ्गम्
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लद्वितीया
कार्तिक ०७ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-1
1
अक्तूबर, 23 2025
Website- www.himsanskritam.com
Email-himsanskrit@gmail.com

2 Shimla News- धामीस्थाने पाषाणवृष्टिः, हस्तात् निसृतेन रक्तेन मातुः भद्रकाल्याः तिलकम्

3 धर्मशालायाम् भविष्यति अखिलभारतीय- विद्यार्थीपरिषदः षट्चत्वारिंशतमम् अधिवेशनम्

4 पृथिवीविज्ञानमन्त्रालयेन ५४ स्वच्छता- अभियानानि चालितानि

## भारतेन जगतः सम्पूर्ण-वन-क्षेत्रे नवमं स्थानं प्राप्य वैश्विक-पर्यावरण-संरक्षणे महत्त्वपूर्णोपलब्धिः अधिगता, वार्षिक-वन-क्षेत्र-वृद्धौ भारतस्य तृतीयं स्थानं यथावत् वर्तते



**हिमसंस्कृतवार्ताः** - भारतेन जगतः सम्पूर्ण-वन-क्षेत्रे नवमस्थानं प्राप्य वैश्विक पर्यावरण-संरक्षणे महत्त्वपूर्णोपलब्धिः अधिगता। इण्डोनेशियायाः बाली नगरे खाद्य-कृषि-सङ्घटनेन प्रख्यपिते ऐषमो वैश्विक-वन-संसाधन-आकलने विवरणं प्रदत्तम्। पर्यावरणमन्त्री भूपेन्द्रयादवः अवोचत् यत् दशम-स्थानात् नवम-स्थान प्राप्तिः वृहदुपलब्धिः वर्तते । इयं प्रगतिः वन संरक्षण-वन्यीकरण-सामुदायिक प्रयासैः पर्यावरण संरक्षणस्य दिशि सर्वकारस्य नीतिनां कार्यक्रमाणां च साफल्यं द्योतयति। श्रीयादवेन उक्तं यत् वार्षिक-वन-क्षेत्र-वृद्धौ विश्वे भारतस्य तृतीयं स्थानं यथावत् वर्तते। तेनोक्तं यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः पदक्षेपेन 'एक पेड मां के नाम' इत्यनेन सम्पूर्णदेशाय वृक्षारोपणस्य प्रेरणा प्राप्ता।

## देशस्य नवीकरणीयर्जा क्षमतायाम् विगतेषु एकादश वर्षेषु उल्लेखनीया वृद्धिः जाता

**हिमसंस्कृतवार्ताः** - देशस्य नवीकरणीयोर्जा क्षमतायाम् उल्लेखनीया वृद्धिः सञ्जाता। इयं वृद्धि चतुर्दशोत्तर-द्विसहस्र-तमवर्षस्य तुलनायां पञ्च-गुणाधिका वर्तते। जलविद्युत प्रतिष्ठानैः उत्पादिता विद्युत् अतः पृथक् अस्ति, नूतननवीकरणी योजो मन्त्रालयेन उक्तं यत् प्रशासनेन त्रिंशदुत्तर द्विसहस्रतम वर्ष यावत् पञ्चशतं गीगावॉट इति परिमितं जैवाश्मोर्जायाः महत्त्वाकांक्षी लक्ष्यं निर्धातिम् मन्त्रालयेन उक्तं यत् भारतस्य नवीकरणीययोजो वृद्धिः गतिः जगत सर्वाधिका वर्तते।

## गृहमन्त्रालयस्य उच्चाधिकार प्राप्त-समितेः लद्दाखस्य नेतृणां च मध्ये विविध-प्रकरणेषु नव-देहल्याम् औपचारिकः संवादः अभवत्

**हिमसंस्कृतवार्ताः** - गृहमन्त्रालयस्य उच्चाधिकार-प्राप्त-समितेः लद्दाखस्य नेतृणां च मध्ये विविध-प्रकरणेषु नव-देहल्यां वार्ता अभवत्। विगते मासे केन्द्रशासित प्रदेशे दुरापादितायाः हिंसायाः अनन्तरं प्रमुखविषयेषु अयं प्रथमः औपचारिकः संवादः वर्तते। उच्चाधिकार प्राप्त-समितेः माध्यमेन लेह एपेक्स बॉडी अथ कारगिल डेमोक्रेटिक अलायंस इत्यनयोः मध्ये वार्ता जाता। उपवेशनस्य अनन्तरं कारगिल डेमोक्रेटिक अलायंस इत्यस्य नेता सज्जाद हुसैन करगिलः अवोचत् यत् अस्माकम् अध्यर्थना लद्दाखाय पूर्णराज्यस्य स्तर प्रदानम् एव वर्तते। असौ अवदत् यत् एकस्मिन् द्वयोः च उपवेशनयोः माध्यमेन एतत् न सम्भवति।

## राष्ट्रपतिः द्रौपदीमुर्मुः केरलस्य सबरीमला मंदिरे पूजा-अर्चनां कृतवती



**हिमसंस्कृतवार्ताः** - राष्ट्रपतिः द्रौपदी मुर्मुः केरलस्य सबरीमला मंदिरे पूजा-अर्चनां कृतवती। केरलस्य चतुर्दिवसीय यात्रावधौ राष्ट्रपतिः तिरुवनंतपुरमतः पथनमथिट्टा गतवती। सा राजमार्गेण पर्वतीय मंदिरे आधारस्थलं पंपां प्रति प्रस्थिता।

## भारतीय-नौसेनायाः अधिकारिणाम् अर्धवार्षिकं सम्मेलनं नवदेहल्याम् आरब्धम्

**हिमसंस्कृतवार्ताः** - नौसेनायाः अधिकारिणाम् अर्धवार्षिकं सम्मेलनं नवदिल्ल्याम् आरब्धम्। ऑपरेशन सिंदूर अभियानस्य अनन्तरं नौसेनायाः नूतनाभियानान् सनद्धतां च निध्याय इदं सम्मेलनं महत्त्वपूर्णं विद्यते। इदं सम्मेलनं राष्ट्रिय नेतृत्वस्य प्रशासनिकाधिकारिणां च मध्ये सम्पर्क-संवादयोः प्रभाविमञ्चः वर्तते। अथ च वर्तमान भू-रणनीतिक परिदृश्ये बहुविध समाह्वानानां निराकरणे नौसेनायाः क्षमतायाः समीक्षां करोति । रक्षामन्त्री राजनाथ सिंहः अद्य नौसेनाधिकारिणः सम्बोधयिष्यति सप्तचत्वारिंशदुत्तर-द्विसहस्रतमाब्दस्य विकसित-भारतस्य रूपरेखां प्रस्तौस्यति। प्रमुखाधिकारिभिः सह नौसेनाप्रमुखः भारतीयसमुद्र-क्षेत्रे सुरक्षास्थितेः सम्बद्ध-योजनानां समीक्षां करिष्यति।

## प्रधान-वैज्ञानिक-परामर्शदेन प्रो.अजय कुमार सूदेन देशे एआई इति कृत्रिम बुद्धिमत्ता स्वीकर्तुं 'कृषि लघु मध्यमोद्यमेभ्यः एआई प्लेबुक' अथ 'एआई सैंडबॉक्स श्वेतपत्रं' प्रसारितम्



**हिमसंस्कृतवार्ताः** - प्रधान-वैज्ञानिक-परामर्शदेन प्रो. अजय कुमार सूदेन देशे उत्तदायी एआई इति कृत्रिम बुद्धिमत्ता स्वीकर्तुं 'कृषि लघु मध्यमोद्यमेभ्यः एआई प्लेबुक' अथ 'एआई सैंडबॉक्स श्वेत पत्रं' प्रसारितम्। एते भारतस्य महत्वपूर्ण क्षेत्रेषु कृत्रिम बुद्धिमत्ता समाधानं प्रवर्तितुं व्यावहारिकतां यच्छन्ति। एतत् व्यापक-क्षेत्रीय परामर्श विशेष-परियोजनासु अन्येषु च विषयेषु प्राप्त परामर्शाधारितं वर्तते।



## सुभाषितम्

मनीषिणः सन्ति न ते हितैषिणः,
हितैषिणः सन्ति न ते मनीषिणः।
सुहृच्च विद्वानपि दुर्लभो नृणां,
यथौषधं स्वादु च दुर्लभम्।।

अर्थात्- जो व्यक्ति मनीषी होते हैं वे हितैषी नहीं होते और जो हितैषी होते हैं वे मनीषी नहीं होते। परन्तु ऐसे व्यक्ति जो मनीषी होने के साथ हितैषी भी हों उसी प्रकार दुर्लभ होते हैं जिस प्रकार स्वादिष्ट परन्तु प्रभावशाली औषधि बहुत ही दुर्लभ होती है।

दैनिकं संस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## कुन्तक-क्षेपकाय क्रीडकाय नीरज चोपड़ा इत्यस्मै भारतीय सेनायां लेफ्टिनेंट कर्नल इति मानदोपाधिः प्रदत्तः

**हिमसंस्कृतवार्ताः** - कुन्तक-क्षेपकाय क्रीडकाय नीरज चोपड़ा इत्यस्मै भारतीय सेनायां लेफ्टिनेंट कर्नल इति मानदोपाधिः प्रदत्तः। नवदिल्ल्यां रक्षामन्त्रिणः राजनाथ सिंहस्य सेना प्रमुखस्य जनरल उपेंद्र द्विवेदिनः च उपस्थितौ अयं समारोहः आयोजितः। नीरज चोपड़ा वर्यस्य गणवेशे तदीय नूतनपदस्य प्रतीकचिन्हं संस्थाप्य असौ आधिकारिकरूपेण पदोन्नतिं प्राप्तवान्। अवधेयं यत् नीरज चोपडा द्विवारम् ओलम्पिकपदकं विजितवान्।

# Shimla News- धामीस्थाने पाषाणवृष्टिः, हस्तात् निसृतेन रक्तेन मातुः भद्रकाल्याः तिलकम्



**हिमसंस्कृतवार्ताः- शिमला।** दीपावल्याः द्वितीयदिने राजधानीशिमलायाः समीपस्थे शिमला-ग्रामीणस्य हलोगधामी-स्थाने "पाषाणस्य क्रीड़ा"-प्राचीनदेवपरम्परायाः क्रीडा आयोजिता। धामीस्थानय क्रीड़ायाः चतुष्पथः अर्थात् "खेल का चौरा" इति स्थाने उपत्यकायाः उभयतः जमोगी-कटेड्डु-समूहयोः मध्ये पाषाणवृष्टिः प्रचण्डा अभवत्। कटेड्डुसमूहस्य सुभाषः हस्ते शिलया आहतः। परम्परानुसारं क्रीड़ायाः चतुष्पथि मातरं भद्रकालीमन्दिरं प्रति तस्य रक्तस्य तिलकं प्रयोज्य पाषाणक्रीडायाः समापनम् अभवत्। शिलाः अवतरन्ति स्म तदा उपस्थिताः शतशः जनाः ढोलस्य ताडनेन नृत्यन्ति स्म। अपराह्णे ३ वादनस्य समीपे शिमलातः ३५ किलोमीटरदूरे क्रीड़ायाः चतुष्पथः इत्यत्र राजपरिवारस्य उत्तराधिकारी जगदीपसिंहस्य, पुरोहितः तनुजस्य, राकेशशर्मणः च उपासकैः शोभायात्रा, पुष्पैः च सह ढोलकैः, तुरहीभिः च आयोजिता। पुष्पेन्द्रसिंह, दुर्गेश सिंह, रंजीत सिंह, चेतरामः, लेखरामः, बाबुरामः, प्रकाशः, हेतरामः, प्रकाशः, नीलः, आदिभिः सहितं शोभायात्रा सायं ३:४० वादने "सती का शारड़ा" इति स्मारकं प्राप्ता। नमस्कारं कृत्वा आयोजकाः ध्वजस्य उत्थापनस्य संकेतं दत्तवन्तः। उपत्यकायाः एकस्मिन् पार्श्वे जमोगीसमूहः, अपरतः कटेड्डुसमूहः च शिलापातं कर्तुम् आरब्धवान्।
प्रायः सायं ४:४० वादने आयोजकाः क्रीडायाः स्थगनस्य संकेतं दत्तवन्तः यदा सुभाषस्य हस्ते कटेड्डु-समूहस्य शिलायाः आघातः अभवत्। स्मारके प्रणामं कृत्वा पर्वते स्थिते भद्रकालीमन्दिरे तिलकसमारोहः कृतः। ततः सुभाषस्य प्राथमिकचिकित्सा कृता। अस्मिन् क्रीडने जमोगी- कटेड्डु-समूहयोः सम्मुखीकरणं भवति। जमोगीपक्षे जनिया, जमोगी, प्लानिया, कोठी, चईयां, ओखरू ग्रामेभ्यः जनाः भागं गृह्णन्ति। कटेड्डुराजपरिवारस्य पक्षतः अस्मिन् समूहेतुनड्डु, धगोई, बठमाणा, समीपस्थानां च ग्रामाणां च युनः भागं स्वीकुर्वन्ति।

### नरबलिदानस्य विकल्परूपेण आरब्धा परम्परा

राजपरिवारस्य उत्तराधिकारी जगदीपसिंहः व्याख्यातवान् यत् शताब्दपूर्वं राजपरिवारस्य राजमाता नरबलिदानस्य विकल्परूपेण एतस्य क्रीडायाः आरब्धवती, यत् अस्य क्षेत्रस्य जनानां कृते किमपि संकटं न भवेत्। विकल्परूपेण क्रीडायाः समये यत् रक्तं प्रक्षिप्तं तस्य उपयोगेन चौरास्थे मन्दिरे भद्रकाली अभिषेकः कृतः। ततः परं एषा परम्परा प्रचलति। कोविड-१९ महामारीकाले जगदीपसिंहः भद्रकालीं स्वरक्तेन अभिषेकं कृत्वा एतां परम्परां संरक्षितवान्।

# प्रथमवारं बडादेव छमाहुं इत्यस्य स्थलं प्राप्तः

## चुन्जवालामहादेवः तिसृणां महाशक्तीनां एकत्र दर्शनम्



**हिमसंस्कृतवार्ताः- मण्डी।** इतिहासे प्रथमवारं मण्डीमण्डलस्य सराजउपत्यकायाः अध्यक्षदेवता चुंजवालामहादेवः कुल्लूमण्डलस्य बडादेव छमाहुं इत्यस्य पवित्रभूमिं धाराखरीं प्राप्तवान्। एतद् ऐतिहासिकं क्षणम् देवसंस्कृतौ आधारभूतः अभवत्, यतः द्वयोः मण्डलयोः प्रमुखदेवताः मिलितवन्तः। इयं यात्रा न केवलं क्षेत्रस्य हरियाणानां (भक्तानाम्) आध्यात्मिकोत्सवः, अपितु स्थानीयलोकपरम्पराणां, संस्कृतीनां च सजीवसङ्गमः अपि अस्ति।
बुधवासरे देवचुञ्जवाला महादेवः सराज उपत्यकायां मुहाथहार-इत्यतः सप्तहाराणां प्रायः ६०० भक्तैः सह धाराखरी-ग्रामस्य दलीग्रामम् आगतः। अखरोटपुष्पवृष्ट्या तस्य भव्यं पारम्परिकं च स्वागतं कृतम्। वातावरणं भक्तिपूर्णम् आसीत्। अस्याः यात्रायाः मुख्यविषयं युगपत् तिसृणां महाशक्तीनां दर्शनं आसीत्। धाराखरीभूमौ प्रथमवारं देव-चुंजवाला- महादेवः स्थानीयदेवताभिः बड़ा देव छमाहुं, माता तोतला इत्यनया च सह "देवमिलनम्" अकरोत्। एतस्य विलक्षणस्य घटनायाः साक्षिणः शतशः जनाः अभवन्, देवताः सर्वेभ्यः सुखं, समृद्धिं, कल्याणं च दत्तवन्तः। देवचुंजवाला महादेवस्य नेहराहारस्य खुण्डाप्रभारी राजेन्द्रसिंह महोदयेन उक्तं यत् देवबडा छमाहुं इत्यस्य पवित्रभूमौ प्रथमवारं देवताः आगताः। उभयोः देवयोः हरियाणाः वर्षाणि यावत् एतत् शुभं क्षणं प्रतीक्षन्ते। सः अपि स्पष्टीकरोति यत् यद्यपि पूर्वं द्वयोः देवतयोः अन्येषु स्थानेषु मिलनं जातम् तथापि देवबडा छमाहुं इत्यस्य स्वप्रदेशे एषः प्रथमः समागमः अस्ति, येन एतत् ऐतिहासिकं भवति।इतरथा देवबडा छमाहुं-इत्यस्य पालसरा दीपकमहोदयेन उक्तं यत् एषा सभा सम्पूर्णे देवसमुदाये आनन्दं, उत्साहं च आनयत्। एतेन द्वयोः प्रदेशयोः सांस्कृतिकं आध्यात्मिकं च सम्बन्धं अधिकं सुदृढं भविष्यति। गुरुवासरे दलीग्रामे निवसन्ति शुक्रवासरे च स्वमूलमन्दिरं प्रति प्रस्थास्यन्ति। इयं यात्रा अस्य प्रदेशस्य समृद्धानां लोकपरम्पराणां, परस्परभ्रातृत्वस्य, गहनविश्वासस्य च जीवन्तं प्रतीकम् अस्ति।

# द्विदिवसीय- अन्ताराष्ट्रीय- सम्मेलनस्य समापनम्

हिमसंस्कृतवार्ताः-राजकीय- महाविद्यालये बिलासपुरे द्विदिवसीय- अन्ताराष्ट्रीय- सम्मेलनस्य समापनमभवत्। ज्ञातव्यं यत् सम्मेलनमिदं हिम- साइंस- कांग्रेस- संगठनेन बिलासपुरमहाविद्यालयेन सह आयोजितमासीत् यत्र देश-विदेशयोः प्राध्यापक- वैज्ञानिकैः स्वव्याख्यानानि, शोधपत्राणि च प्रस्तुतानि। अस्मिन् सम्मेलने अंतरराष्ट्रीय- राष्ट्रीय- स्तरयोः 190 शोधपत्राणि प्रस्तुतानि। सम्मेलनस्य उद्घाटनसत्रे राष्ट्रिय- प्रौद्योगिकी- संस्थानस्य (NIIT) हमीरपुरस्य निदेशकः हीरालाल मुरलीधर सूर्यवंशी मुख्यातिथिरूपेण, कार्यक्रमस्य समापने प्रो. एच. सी. शर्मा, यशवंत परमार विश्वविद्यालयस्य पूर्व उप कुलपतिः मुख्यातिथि आसीत्। कार्यक्रमस्य प्रारंभिकसत्रे मुख्यवक्तारूपेण सिंगापुर- राष्ट्रीय- विश्वविद्यालयस्य (नेशनल यूनिवर्सिटी ऑफ सिंगापुर) प्रो. बिंलिक्स स्वकीयं शोधपत्रं प्रस्तुतम्। यस्य मुख्यविषयः 'फोटोडायनेमिक थेरेपी' इति आसीत्।
समापने पेरिस विश्वविद्यालयस्य (यूनिवर्सिटी ऑफ पेरिस) प्रो. फिलिप रोजरवर्यः "वन डाइमेंशनल को पॉलीमर" इति विषये स्वव्याख्यानं प्रस्तुतम्। एतदतिरिक्तं षड् आमंत्रित व्याख्यानानि अपि प्रस्तुतानि यत्र डॉ. वाई के रावलः, प्रो. दुनी चंदः, प्रो. पवनकुमारः, प्रो. परमजीत कौर, डॉ. पी. सी. पठानिया, डॉ. दिनेशकुमारशर्माद्वारा प्रस्तुतम्। बिलासपुरमहाविद्यालयस्य प्राचार्यः डॉ. पी. एस. कटवालवर्यः विशिष्टातिथिरूपेण कार्यक्रमे उपस्थितः आसीत्। कार्यक्रमे 190 शोधपत्राणि प्रस्तुतानि कृतानि। द्विदिवसयोः बिलासपुरस्य 12 परियोजनाः (प्रोजेक्ट) अपि प्रस्तुताः, यत्र सर्वोत्तमानां चतुर्णां कृते पुरस्काराः अपि प्रदत्ताः। हिमसाइंसकांग्रेससंगठनेन राजकीयः महाविद्यालयः बिलासपुरस्य प्राचार्यस्य डॉ. पी. एस. कटवालवर्यस्य धन्यवादः कृतः। महाविद्यालयपरिवारस्य अपि आभारः प्रकटितः यस्य सहयोगेन सम्मेलनमिदं सफलममभवत्।

# धर्मशालायाम् भविष्यति अखिलभारतीय-विद्यार्थीपरिषदः षट्चत्वारिंशतमम् अधिवेशनम्

## अधिवेशनस्थले स्थाप्यते प्रदर्शनी

**हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, धर्मशाला।** अखिलभारतीय- विद्यार्थीपरिषदः हिमाचलप्रदेशस्य षट्चत्वारिंशतम् अधिवेशनं आगामी ३१ अक्तूबर, १ तथा २ नवम्बरतिथिषु काङ्गड़ाजनपदस्य गुप्तगङ्गायाम् आयोजितं भविष्यति। अस्मिन् अधिवेशने प्रदेशस्य सर्वतः पञ्चशताधिकाः प्रतिनिधयः सहभागिनः भविष्यन्ति। प्रदेशस्य एकोनविंशतिः सङ्घटनात्मकजनपदानां सहभागिता अधिवेशनस्य विशिष्टतां जनयिष्यति, यस्मिन् लघु हिमाचलदर्शनम् अपि दर्शनीयं भविष्यति। एतद्विषये परिषदः पदाधिकारीभिः बुधवारे धर्मशालायां आयोजिते पत्रकारसम्मेलने सूचितम्।

अधिवेशने वर्षपर्यन्तं सङ्घटनद्वारा सम्पन्नानि शैक्षिकानि, रचनात्मकानि, च आंदोलनात्मकानि कार्याणि विस्तृतरूपेण चित्रितानि प्रदर्श्यन्ते। प्रदेशमन्त्री स्वस्य वार्षिकमन्त्रिप्रतिवेदनस्य माध्यमेन वर्षपर्यन्तगतिविधीनां विस्तृतविवरणं अधिवेशने प्रस्तुतं करिष्यति। अस्मिन् अधिवेशने नूतनः प्रदेशाध्यक्षः च प्रदेशमन्त्री च चयनितौ भविष्यतः। वर्तमानसामाजिक- शैक्षिकपरिदृश्ययोः आधारभूते द्वौ महत्वपूर्णौ प्रस्तावौ अपि पारितौ भविष्यतः। तयोः माध्यमेन हिमाचलप्रदेशस्य शिक्षाव्यवस्था, सामाजिकविषयेषु च विद्यार्थीपरिषदः स्पष्टं दृष्टिकोणं प्रदर्शयिष्यति। अधिवेशने केन्द्रीयप्रदेशीयक्षेत्रीयस्तरस्थाः वरिष्ठपदाधिकारिणः अपि उपस्थिताः भविष्यन्ति। काङ्गड़ाजनपदस्य कार्यकर्तारः अर्धमासाधिककालं यावत् अधिवेशनस्य सिद्ध्यर्थं प्रवृत्ताः सन्ति। समाजस्य विविधवर्गाणां, पूर्वकार्यकर्तृणां, स्थानिकनागरिकाणां च उत्साहपूर्णसहयोगः अधिवेशनस्य सफलतायै चतुर्गुणं शोभां दास्यति।

एतदधिवेशनं न केवलं सङ्घटनस्य प्रेरणादायकं भविष्यति, किन्तु हिमाचलप्रदेशस्य विद्यार्थी-आन्दोलनस्य दिशां दशां च निर्धास्यति। इदं ऐतिहासिकसन्धिस्थलवत् अवसरं भविष्यति।

# "महिलानेतृत्वेन विश्वशान्तिः भविष्यति, संवादः एव समाधानम्"- दलाईलामा

## जापानस्य प्रथममहिलाप्रधानमन्त्रिणं प्रति पत्रं विलिख्य कृतम् अभिनन्दनम्

**हिमसंस्कृतवार्ताः- धर्मशाला।** तिब्बतीदेशस्य आध्यात्मिकनेता दलाई लामा इत्यनेन जापानदेशस्य प्रधानमन्त्रीरूपेण निर्वाचितायै साने ताकाइची इत्यस्यै अभिनन्दनपत्रं लिखितम्। सः लिखितवान् यत्, "निःसंदेहं भवत्याः दशकानां लोकसेवा भवत्याः देशस्य इतिहासस्य अस्मिन् महत्त्वपूर्णे सङ्केते जापानदेशस्य नेतृत्वे उपयोगी सिद्धा भविष्यति, यदा विश्वं प्रमुखानां आह्वानानां सम्मुखीकरणं करोति। परमाणुशस्त्राक्रमणस्य परिणामेण अपारं कष्टं प्राप्य जापानदेशः विश्वे शान्तिस्थापनार्थं प्रयत्नेषु अग्रणीभूमिकां दृढतया स्वीकृतवान् अस्ति परमाणुनिरस्त्रीकरणस्य मुखरसमर्थकः अभवत्। विशेषतः यस्मिन् काले विश्वस्य अनेकभागेषु अनिश्चितता, अशान्तिः च वर्तते, तस्मिन् काले संवादेन कूटनीतिद्वारा च समस्यानां समाधानार्थं ठोसप्रयत्नाः करणीयाः इति महत्त्वपूर्णम्। दलाई लामा पत्रे लिखितवान् यत् भवत्याः व्यक्तिगतसाधनानाम् अतिरिक्तं भवती जापानदेशस्य प्रथमा महिलाप्रधानमन्त्री निर्वाचिता इति ज्ञात्वा सः आनन्दितः अस्ति। दलाईलामायाः मते स्त्रियः दयालुः, परभावनाः प्रति संवेदनशीलाः च भवन्ति, एते गुणाः प्रथमं स्वमातुः ज्ञाताः। तत्र वैज्ञानिकसाक्ष्यमपि अस्ति यत् करुणायाः विषये स्त्रियः परवेदनाः प्रति अधिकाः संवेदनशीलाः भवन्ति। धर्मगुरुणां मते यदि अधिकाः महिलाः नेतारः स्युः तर्हि जगत् अधिकं अवगन्तुं शान्तिपूर्णं च स्यात्।

# हिमाचलप्रदेशे सर्वेषां शिक्षकाणां कृते अध्यापकपात्रतापरीक्षायाः अनिवार्यतायाः कारणेन आवेदनसंख्या वर्धिता

हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, धर्मशाला। सर्वेभ्यः अध्यापकेभ्यः अध्यापकपात्रता-परीक्षां उत्तीर्णां कर्तुं सर्वोच्चन्यायालयेन अनिवार्यतां निर्दिष्टां कृत्वा, अस्मिन् वर्षे हिमाचलप्रदेश- विद्यालय-शिक्षाबोर्ड मध्ये आवेदनसंख्यायां वृद्धिर्भविता अस्ति। अनेन कारणेन शिक्षाबोर्डस्य समीपे षण्मासपूर्वं जून २०२५ मासे जातायाः अध्यापकपात्रतापरीक्षायाः तुलनायां, नवम्बरमासे आयोज्य परीक्षायाः कृते १९७२ आवेदनानि अधिकानि प्राप्तानि सन्ति। एतस्मिन् समये कतिचन विषयेषु आवेदनसंख्या न्यूनाभूता, किन्तु जेबीटी, संस्कृतं, विज्ञानविषये च आवेदनसंख्या वर्धिता। प्राप्तसूचनानुसारं हिमाचलप्रदेश-विद्यालय- शिक्षाबोर्डेन नवम्बरमासे आयोज्य अध्यापक- पात्रता- परीक्षायाः (टेट) कृते १० सितम्बरात् ८ अक्तूबरपर्यन्तम् ऑनलाइन-आवेदनानि स्वीकृतानि। अस्मिन् अवधौ शिक्षाबोर्डस्य समीपे आहत्य ३८,८८३ आवेदनानि प्राप्तानि। तत्र ३६,५७१ आवेदनानि सम्यक् प्राप्तानि सन्ति। अस्य वर्षस्य आवेदनसंख्या, षण्मासपूर्वं जातायाः परीक्षायाः अपेक्षया १९७२ अधिका अस्ति। बोर्डस्य समीपे जूनमासस्य तुलनायां, नवम्बरमासे जेबीटी-विषये २६१५, विज्ञानविषये २३७, संस्कृतविषये ६१६ आवेदनानि अधिकानि प्राप्तानि।

एतस्मिन्नन्तरे कतिचन विषयेषु, यथा कला, गणित, विशेषशिक्षणविषयेषु च आवेदनसंख्या न्यूनाभूता। अनुमान्यते यत् आवेदनवृद्धेः प्रमुखं कारणं सर्वोच्चन्यायालयेन सर्वेषाम् अध्यापकानां कृते अध्यापकपात्रतापरीक्षायाः अनिवार्यता निर्दिष्टा भवेत्।

***जूनमासे जातायाः अध्यापकपात्रता-परीक्षायाः तुलनायां अस्मिन् नवम्बरमासे शिक्षाबोर्डस्य समीपे १९७२ आवेदनानि अधिकानि प्राप्तानि। शिक्षाबोर्डप्रशासनम् अपि कतिचन अपूर्णानि आवेदनानि निरस्तानि कृतवान्। परीक्षा द्वितीयात् नवम्बरात् षोडशतमे नवम्बरपर्यन्तं भविष्यति।-***

**डॉ० (मेजर) विशाल शर्मा, सचिवः, विद्यालय-शिक्षाबोर्ड।**

# भ्रातृद्वितीयायां महिलाभ्यः हिमाचल- पथ- परिवहननिगमस्य बसयानेषु निःशुल्कयात्रा

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे भ्रातृद्वितीयायां महिलाभ्यः हिमाचल-पथपरिवहननिगमस्य यानेन निःशुल्कयात्रा भविष्यति। भगिन्यः भ्रातृद्वितीयायाः दिने भ्रातृभ्यः तिलकं प्रयोजयन्ति। फलतः अस्मिन् दिने महिलानां निःशुल्कयात्रायाः घोषणा सर्वकारेण कृता। अपि च अस्मिन्नदिवसे सर्वकारीयकार्यं कुर्वतीनां महिलानां कृते अपि अवकाशः भविष्यति। निगमप्रबन्धनस्य अनुसारं प्रातः ०६ वादनतः सायं ०६ वादनपर्यन्तं निगमबसयानेषु महिलाः निःशुल्कां यात्रां कर्तुं शक्नुवन्ति। अस्मिन् वर्षे भ्रातृद्वितीया अक्तूबर २३ दिनाङ्के गुरुवासरे आचर्यते। उत्सवस्य सज्जतायाः मध्ये भ्रातरः भगिन्यः च परस्परं उपहारस्य, वस्त्रस्य च क्रयणं कर्तुं व्यग्राः दृश्यन्ते स्म। अस्य अवसरस्य कृते क्रीताणि मुख्यवस्तूनि सन्ति यथा पिष्टदीपः, रोली, केसरः, अखण्डतण्डुलः, नारिकेलं, मिष्टान्नं, फलानि, सप्तताम्बुलपत्राणि, चन्दनानि च, यतः एतेषां वस्तूनाम् अस्मिन् उत्सवे विशेषं महत्त्वं वर्तते।



# HP TOURISM: दीपावल्याः अनन्तरं पर्यटनव्यवसायः गमनवेगं प्राप्स्यति, अतिथिगृहेषु अग्रिमस्थाननियोजनं प्रवर्तमानम्,



## हिमवृष्टिः पर्यटकान् आकर्षयति

हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः। दीपावल्याः परं हिमाचलप्रदेशस्य विविधेषु पर्यटनस्थलेषु व्यवसायः प्रगत्याः मार्गं गमिष्यति। गुजरातमहाराष्ट्रराज्याभ्याम् आगच्छन्तः पर्यटकाः विशालसङ्ख्यया शिमलां, कुफरीं, नारकण्डां, कसौलीं, चायलं, किन्नौरं, मनालीं, धर्मशालां च पर्यटनार्थं गत्वा अतिथिगृहेषु कक्षस्थानानि अग्रिमरूपेण आरक्षयन्ति। प्रदेशे सप्ताहान्तपर्यटनं पूर्वमेव तीव्रं जातम्। कालका- शिमला-धरोहररेलमार्गे सञ्चरन्ति रेलयानानि पञ्चदश नवम्बरपर्यन्तं सम्पूर्णतया आरक्षितानि सन्ति, आसनानां प्रतीक्षा-यादी च दीर्घा अस्ति।

अक्तूबरमासस्य अन्ते तथा नवम्बरमासस्य आदौ प्रदेशस्य पर्यटनस्थलानि पर्यटकैः पूर्णानि भविष्यन्ति। रोहताङ्ग-पथं, लाहौल-स्पीति-प्रदेशं, चांशलम् इत्यादीनि उच्चप्रदेशस्थानानि हिमवृष्ट्या आच्छादितानि, येन पर्यटकः अतीव हृष्टाः भवन्ति। शीतऋतुपर्यटनकाले हिमवृष्ट्यानन्तरं प्रतिवर्षं हिमाचले पर्यटकानां प्रवाहः दृश्यते। पर्यटकाः देशस्य सर्वतः आगत्य कुल्लू–मनालीं, शिमला–नारकण्डां, लाहौल–स्पीति स्थानानि च गत्वा हिमक्रीडां कुर्वन्ति।

मार्गव्यवस्थायाः व्यवसवथिते जाते मनाल्यां पर्यटकानां संख्या वर्धमानां दृष्टा। सप्ताहस्य सामान्यदिवसेषु ३०–४० प्रतिशतं, सप्ताहान्तेषु तु ५०–६० प्रतिशतपर्यन्तं स्थानग्रहणदरः दृश्यते। होटल-रेस्टोरन्ट-संघस्य अध्यक्षः गजेन्द्रचन्द्रः ठाकुरः उक्तवान्- “दीपावली-अवकाशेषु गुजरात-महाराष्ट्रप्रदेशाभ्यां आरक्षणम् प्रारब्धम् अस्ति। यदि दीपावल्याः अनन्तरं हिमवृष्टिः भवेत् तर्हि पर्यटनऋतुं स्फीतं भविष्यति।”

### क्रिसमस-नववर्षयोः हिमवृष्टिः भवेत् चेत् नूतनाः अभिलेखाः भवेयुः।

अस्मिन् वर्षे ऋतुविज्ञानविभागेन हिमालयप्रदेशेषु सामान्यतया अपेक्षया अधिका हिमवृष्टिः भविष्यतीति सूचितम्। पर्यटनव्यवसाय-संबद्धजनाः तद् उत्तमं व्यापारसंधिं मन्यन्ते। यात्रासंघस्य महासचिवः मनु सूदः उक्तवान्- “श्वेत-क्रिस्मस् च नववर्षोत्सवश्च पर्यटकानां मध्ये विशेषं आकर्षणं जनयतः। अस्मिन् वर्षे तयोः अवसरयोः हिमवृष्टिः भवेत् चेत् हिमाचलम् आगच्छताम् पर्यटकानां संख्या अभिलेखभङ्गं करिष्यति।”

# गतांकादग्रे.....

## महाराज- अग्रसेनस्य वंशवृक्षः

महाराज- अग्रसेनस्य वंशजाः तस्य १८ पुत्राः- १८ गोत्राणाम् अग्रवालाः सन्ति, रानी माधवी नागगोत्रस्य आसीत् इति कारणतः १८ राजपुत्राणां पत्न्यः अपि नागगोत्रस्य आसन्। ते १८ पुत्राः वासुकिनागराजस्य कन्याभिः सह विवाहं कृतवन्तः। अतः अग्रवालजनाः, नागभिः सह मातृसम्बन्धम् अस्ति इति मन्यन्ते, तान् मातुलः इति वदन्ति।

### प्रत्येकं गोत्रस्य विषये इतोऽपि सूचनाः

**गर्गगोत्रम्-** अग्रवालेषु सर्वाधिकं प्रचलितं गोत्रम्।
गर्गाचार्यऋषिणा सह यजुर्वेदेन सह च सम्बन्धम् स्तः।
**गोयलगोत्रम्-** ऋषिगौतमेन सह एवं यजुर्वेदेन सह च सम्बन्धम् स्तः। **गोयनगोत्रम्-** ऋषिगौतमतः उत्पन्नः अभवत् इति विश्वासः।**बंसलगोत्रम्-** ऋषिवत्सतः उत्पन्नः अभवत् इति विश्वासः।**कंसलगोत्रम्-** ऋषिकश्यपेन सह सम्बन्धम् इति विश्वासः।**सिंघलगोत्रम्-** ऋषिभरद्वाजतः सम्बन्धम्।
**मंगलगोत्रम्-** ऋषिअग्नितः एवं सूर्यतः च उत्पन्नः अभवत् इति विश्वासः।**जिंदलगोत्रम्-** ऋषिविश्वामित्रतः उत्पन्नः अभवत् इति विश्वासः।**टिंगलगोत्रम्-** मूलम् अस्पष्टम् अस्ति, परञ्च सम्भवतः ऋषिभृगुतः उत्पन्नः अभवत् इति विश्वासः।
**ऐरणगोत्रम्-** ऋषिइक्ष्वाकुतः उत्पन्नः अभवत्!
**धरणगोत्रम्-** मूलम् अस्पष्टम् अस्ति, परञ्च सम्भवतः ऋषिधर्माध्यक्षेन सह सम्बन्धम् अस्ति, इति विश्वासः।
**मधुकुलगोत्रम्-** ऋषिमधुकुलतः उत्पन्नः अभवत् इति विश्वासः। **मित्तलगोत्रम्-** ऋषिमैत्रेयतः उत्पन्नः अभवत् इति विश्वासः। **तायलगोत्रम्-** मूलम् अस्पष्टम् अस्ति, परञ्च सम्भवतः ऋषितैत्तिरीयेन सह सम्बन्धम् अस्ति, इति विश्वासः।
**भण्डालगोत्रम्-** ऋषिभरद्वाजतः उत्पन्नः अभवत् इति विश्वासः। **कुच्छलगोत्रम्-** मूलम् अस्पष्टम् अस्ति, परञ्च सम्भवतः, ऋषिकश्यपतः उत्पन्नः अभवत्!
**नांगलगोत्रम्-** नागदेवतातः उत्पन्नः अभवत् इति विश्वासः।
**ईंदलगोत्रम् (अथवा येन्दले)-** मूलम् अस्पष्टम् अस्ति, परञ्च सम्भवतः, ऋषिइन्द्रतः उत्पन्नः अभवत् इति विश्वासः।

**डॉ.विदुषी अग्रवालः,हिमसंस्कृतवार्ताः**

# स्नानमाहात्म्यम् [द्वितीयः तथा च अन्तिमः भागः]

पञ्चोपचारश्च षोडशोपचारश्च अस्माकं सर्वासु पूजासु क्रियन्ते परन्तु पञ्चामृतस्नानं तत्र महत्त्वपूर्णं श्च अस्ति। अन्ये केचन महत्त्वपूर्णाः स्नानप्रकाराः-
{१} ऋषिस्नानः- प्राकृतिकजलस्रोतेषु, यदा आकाशे नक्षत्राणि दृश्यन्ते तदा कृतः स्नानः।
{२} ब्रह्मस्नानः- सूर्योदयात् सार्धघण्टापूर्वं कृतं स्नानम्। सूर्योदयात् सार्धघण्टापूर्वं ब्रह्ममुहूर्तं वर्तते।
{३} देवस्नानः- सूर्योदयानन्तरं नद्यां कृतं स्नानम्। तस्मिन् समये नद्याः स्मरणं करणीयम्।
{४}मानवस्नानः- सामान्यतया प्रातःस्नानम् इति मानवस्नानः कथ्यते।
{५} मुनिस्नानः- प्रातःकाले स्नानस्य समये मौनं धृत्वा केवलम् ईश्वरस्य स्मरणं करणीयम्। एषः स्नानः मुनिस्नानः उच्यते।
{६} राक्षसस्नानः- दिनस्य कस्मिन् अपि काले स्नानं राक्षसस्नानं कथ्यते।
'स्नानस्य ऋतवः तथा च धार्मिकपरम्पराः-
{१} कार्तिकस्नानः {२} माघस्नानः। अस्माकं धर्मे कार्तिकस्य माघमासस्य च स्नानम् अतीव महत्त्वपूर्णम् अस्ति।
ईश्वरस्य कृते शङ्खोदकस्नानं, इक्षुरसस्नानं, सुगंधोदकस्नानम् अस्ति। मनुष्याणां कृते बाष्पस्नानानि, तैलस्नानानि, उष्णावालुकास्नानानि च सन्ति।



'केचन साहित्यिकस्नानप्रकाराः-'
{१} सचैलस्नानः- वस्त्रं धृत्वा यः स्नानं क्रियते तद् स्नानः सचैलस्नानः कथ्यते।
{२} काकस्नानः- केवलं शरीरं जलेन् सिञ्चते।
{३} स्नानस्य गुटीका- स्नानं न करणीयम्। महिषीस्नानः- अतिदीर्घकालं स्नानं महिषीस्नानः अस्ति। महिषः जले स्थातुं रोचते। एतादृशस्य स्नानस्य माहत्म्यम् अस्ति। लेखस्य विषये भवता किं चिन्तितम्? कृपया मां सूचयन्तु।

दीपावल्या तथा च अभ्यङ्ग स्नानस्य शुभाशयाः।

**डा वर्षा प्रकाशः टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# चिन्तनम्

सोशल मीडिया इत्यस्य वर्तमानयुगे भगवान् श्रीकृष्णद्वारा 'स्थितप्रज्ञस्य लक्षणवर्णनकाले एतत् तु अवश्यमेव उक्तं स्यात् यत् "हे अर्जुन! त्वया WhatsApp माध्यमेन प्रेषितभावपूर्णसन्देश इत्येतेषां पठन-अनन्तरम् अपि लेशमात्रं प्रत्युत्तरं न ददाति तं मनुष्यं 'स्थितप्रज्ञः' विद्धि।"

*-संस्कृतभाषी (देवेशः)*

# पृथिवीविज्ञानमन्त्रालयेन ५४ स्वच्छता-अभियानानि चालितानि




पृथिवीविज्ञानमन्त्रालयेन लम्बितप्रकरणानाम् निष्कासनार्थं विशेषाभियानस्य पञ्चमचरणस्य अन्तर्गतं ५४ स्वच्छता-अभियानानि चालितानि यत्र ५०० तः अधिकानां सञ्चिकानां अभिलेखानां च सम्यक् समीक्षायाः अनन्तरं १९२ सञ्चिकाः निष्कासिताः ।प्रशासनिकपरिष्कारविभागस्य नेतृत्वे अयं राष्ट्रव्यापी अभियानः अक्टोबर्-मासस्य २ दिनाङ्के आरब्धः । अभियानस्य अन्तर्गतं मन्त्रालयेन ई-कचराणां सम्यक् निष्कासनं कृत्वा ₹३.३ मिलियनतः अधिकं राजस्वं प्राप्तम् । प्रायः ८,७५० वर्गफीट् भूमिः अपि स्वच्छा कृता अस्ति ।